# पाठः - १ अतिलोभः अनर्थाय

**आमुखम् ।**

विष्णुशर्मणा विरचितं भवति पञ्चतन्त्रम्। पञ्चतन्त्रे पञ्च तन्त्राणि सन्ति। मित्रलाभः, मित्रभेदः, लब्धप्रणाशः, काकोलूकीयम्, अपरीक्षितकारकं चेति। काकोलूकीयाद् उद्धृतः भवति अयं पाठभागः।

| व्यवहाररूपाणि आशयः/धारणा/ | प्रक्रिया/पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| अतिलोभः अनर्थाय।<br>लोभः नाशाय भवति।<br>कथा | उच्चैः वाचनम्।<br>कथाकथनम्।<br>नूतनपदानां विवेचनम्।<br>अर्थलेखनम्।<br>कथासंक्षेपलेखनम्।<br>क्रियापदचयनम्। | कथालेखनं,<br>वाचनं,<br>स्वभावरूपीकरणं,<br>कथाकथनम्।<br>चित्रं दृष्ट्वा<br>कथाकथनम्।<br>क्रियापदचयनम्। |

**पाठस्य नाम** - **अतिलोभः अनर्थाय**

**उद्देश्यम्** - स्वार्थचिन्तागतेः त्यागाय निस्वार्थचिन्तागतेः बोधनाय च पाठोऽयम् आयोजितः।

**नैपुणी** - भाषणं, लेखनं, निरीक्षणं, वाचनं, विवेचनं, कथाकथनम्।

**आधारग्रन्थः** - पञ्चतन्त्रकथा।

**अन्तर्जालसाध्यता** - सान्द्रमुद्रिका, ध्वनिमुद्रिका, नववाणी इत्याद्याः।

**समयः** - १२ कालांशाः।

**प्रवर्तनम् १** - **कथांशानाम् अवतारणम्।**

**उद्देश्यम्** - **चित्रं निरीक्ष्य कथाकथनम्।**

**प्रक्रिया** - अध्यापिका कक्ष्यां प्रविश्य कुशलप्रश्नानन्तरं किमपि अभिनयगीतम् आलपतु। अनन्तरं सर्वे अनुगायन्तु। यथा-

'एकमिति वदाम एकीभूय तिष्ठामः।

'द्वे' इति वदामः दोलनं करवाम।

'त्रीणि' इति वदामः पाणिभ्यां प्रहरामः।

'चत्वारि' इति वदामः सत्वरं धावामः।

'पञ्च' इति वदामः पञ्चीभूय तिष्ठामः।

अस्यां क्रीडायां संख्यासूचकशब्दाः के के इति अध्यापिका पृच्छतु। छात्राः वदन्तु,। छात्रैरुक्तानि श्यामफलके लिखतु। लिखितपदानाम् उच्चैः वाचनाय निर्दिशतु। अनन्तरम् अध्यापिका चार्ट्पत्रे किमपि गानं विलिख्य प्रदर्शयतु, गायतु सर्वे अनुगायन्तु।

''लोभात् क्रोधः प्रभवति

लोभात् कामः प्रजायते।

लोभान्मोहश्च नाशश्च

लोभः पापस्य कारणम्।।''

अनन्तरं लघुप्रश्नान् मातृभाषया पृच्छतु। छात्राणाम् उत्तराणि क्रोडीकृत्य आशयं विशदयतु।

**आशयः -** लोभात् यथाक्रमं क्रोधः कामः मोहः नाशश्च जायन्ते। अतः लोभः पापस्य कारणं भवति।

अनन्तरम् अध्यापिका पुस्तके दत्तानां चित्राणां सम्यक् निरीक्षणाय निर्दिशतु। चित्रे किं किं पश्यन्ति इति पृच्छतु।

यथा - प्रथमचित्रे किं पश्यति?

उत्तरम्- क्षेत्रसमीपे एकः मनुष्यः अस्ति।

सः कः?

कृषकः।

कालान्तरे किमभवत्?

कृषिनाशः अभवत्।

इत्यादिरूपेण उत्तराणि क्रोडीकृत्य श्यामफलके लिखतु। पुनः वाचनाय निर्दिशतु। वाचनसमये छात्राणां स्खालित्यानि निवारयतु। ततः छात्रान् सङ्घीकृत्य पाठभागस्य वाचनाय निर्दिशतु। प्रतिसङ्घं गत्वा स्खालित्यानि निवारयतु। सङ्घाद् एकैकम् उच्चैः वाचनाय निर्दिशतु। वाचनावसरे सञ्जातं स्खालित्यं परिहरतु। अनन्तरं कथालेखनाय निर्दिशतु। अध्यापिका यथोचितं साहाय्यं करोतु। ततः पाठभागे विद्यमानां कथां चार्ट्पत्रे श्यामफलके वा विलिख्य प्रदर्शयतु।

**मूल्यनिर्णयसूचिकाः** - चित्रनिरीक्षणम्, अपग्रथनम्, चित्रानुसारं कथाकथनम्।

**प्रवर्तनम् २** - **शब्दकोशं निरीक्ष्य अर्थलेखनम्।**

**उद्देश्यम्** - **पदपरिचयः, अर्थावगमनं च।**

**प्रक्रिया** - अध्यापिका कक्ष्यां प्रविश्य पठितपूर्वां कथां पृच्छतु। छात्रान् सङ्घान् कृत्वा पाठभागस्य सम्यक् वाचनाय निर्दिशतु। क्लिष्टपदानां चित्वा लेखनाय निर्दिशतु। श्यामफलके पाठस्थानि कानिचन

पदानि लिखतु। अर्थानां शब्दकोशस्य साहाय्येन लेखनाय निर्दिशतु।

**यथा -** क्षीरम् - पयः।

अन्तिके - समीपे।

विनाशः - नाशः।

सज्जः - उद्युक्तः।

मारयितुम् - हन्तुम्।

पश्यति स्म - अपश्यत्।

नाकुः - वल्मीकम्।

**मूल्यनिर्णयसूचिकाः** - अर्थावबोधः। आशयग्रहणम्। विवेचनसामर्थ्यम्।

**प्रवर्तनम् ३ -** क्रियापदचयनम्।

**उद्देश्यम्** वर्तमानकालभूतकालक्रियापदविवेचनम्।

**प्रक्रिया** अध्यापिका लट् लङ्रूपाणां वेलापटं प्रदर्श्य उच्चैः वाचनाय निर्दिशतु। अनन्तरम् तानि रूपाणि वर्तमानभूतकालक्रियारूपाणि इति विविच्य परिचाययतु। अनन्तरं पट्टिकापूरणाय निर्दिशतु।

यथा-

| लट् | - | लङ् |
|---|---|---|
| पठति | - | अपठत् |
| ...... | - | अभवत् |
| चलति | - | ......... |
| ........... | - | अगच्छत् |

तानि कक्ष्यायाम् अवतारयन्तु छात्राः। अध्यापिका संशोधयतु। अनन्तरं पाठपुस्तके विद्यमानानां क्रियापदानां विविच्य लेखनाय निर्दिशतु । ततः पट्टिकाकरणाय निर्दिशतु । पदानि यथा- ददामि,आसीत्,दशति,अपश्यत्,अभवत्,अर्पयति।

| लट् | लङ् |
|---|---|
| ददामि | आसीत् |
| दशति | अपश्यत् |
| अर्पयति | अभवत् |

**मूल्यनिर्णयसूचिकाः** - अर्थग्रहणं, लकारज्ञानं, क्रियाविवेचनसामर्थ्यं, पट्टिकाकरणम्।

**प्रवर्तनम् ४ - कथाकथनम्।**

**उद्देश्यम् - कथाकथनसामर्थ्यम्।**

**प्रक्रिया**

अध्यापिका कक्ष्यां प्रविश्य पूर्वं पठितां कथां स्मारयित्वा सान्द्रमुद्रिकाद्वारा कामपि कथां कक्ष्यायां प्रदर्शयति। कथायाःअवतारस्य सम्यक् निरीक्षणाय निर्दिशतु। छात्रान् सङ्घान् करोतु ।पाठभागस्थायाः कथायाः अभिनयरूपेण अवतारणाय छात्राःसज्जाःभवन्तु। तदर्थं प्रेरणा दातव्या। प्रतिसङ्घं मूल्यनिर्णयं कर्तुं निर्दिशति। यःसमीचीनया रीत्या अवतारयति तं प्रत्येकमभिनन्दतु । (नववाण्यां बह्व्यः कथाःसन्ति। यथेष्टं स्वीकरोतु। )

**मूल्यनिर्णयसूचिकाः** - सभाकम्पं विना कथाकथनसामर्थ्यम्।
अभिनयपाटवम् ।
अक्षरस्पुटता।
उचिता शैली ।

**प्रवर्तनम् 5 - कोष्टात् पदानि स्वीकृत्य कथालेखनम्।**

**उद्देश्यम् - चित्रानुसारम् पदानि योजयित्वा कथायाः लेखनम्।**

**प्रक्रिया** - छात्राः पाठभागं सम्यक् वाचयन्तु। ततः पठनप्रवर्तने दत्तानि चित्राणि निरीक्ष्य कथामिमां वदन्तु। अध्यापिका तदर्थं प्रेरयतु। कोष्ठकात् पदानि चित्वा चित्राणां स्थाने यथोचितं योजयन्तु। उचिता विभक्तिः प्रयोक्तव्या। एकैकः बालः एकैकं वाक्यं वदतु लिखतु च।अध्यापिका संशोधयतु। छात्राः टिप्पणिपुस्तके लिखन्तु।

**मूल्यनिर्णयसूचिकाः** - आशयग्रहणम्, उचितः विभक्तिप्रयोगः, क्रमीकरणम्।

यथा- १ कर्षकः २ सर्पम् ३ सर्पः ४ क्षीरं ५ सर्पः ६ सुवर्णनाणकं
७ कर्षकः ८ सुवर्णनाणकं ९ बालः १० बालः।

**प्रवर्तनम् ६ - धातुपदलकारपुरुषवचनानां लेखनम्।**

**उद्देश्यम् - धातुपदलकारपुरुषवचनानां परिचयः।**

**प्रक्रिया** - अध्यापिका कक्ष्यामागत्य अधोलिखितं चार्टपत्रं प्रदर्शयतु। तस्य् उच्चैःवाचनाय निर्दिशतु। अनन्तरम् अनुबन्धे दत्तानि रूपाणि सम्यक् निरीक्ष्य प्रदत्तायाः पट्टिकायाःपूरणाय निर्दिशतु।

पठ् धातुः परस्मैपदी लट्

| पुरुषः | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र.पु | पठति | पठतः | पठन्ति |
| म.पु | पठसि | पठथः | पठथ |
| उ.पु | पठामि | पठावः | पठामः |

**क्रमीकृतं चार्ट्पत्रम्**

| क्रियापदम् | धातु | पदम् | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| दशति | ........... | ....... | ........ | ........ | ........ |
| अर्पयति | ........... | ........ | ........ | ........ | ........ |
| दशसि | ........... | ........ | ........ | ........ | ........ |
| अर्पयन्ति | ........... | ........ | ....... | ........ | ........ |

**मूल्यनिर्णयसूचिकाः** - पदार्थज्ञानम् , आशयग्रहणम्, क्रमीकरणम्।

# अनुबन्धप्रवर्तनम्

**प्रवर्तनम्** - **कथास्तम्भक्रमीकरणम्।**

**उद्देश्यम्** - **आशयग्रहणम् आशयानां क्रमीकरणं च।**

**प्रक्रिया** - अध्यापिका छात्रान् सङ्घान् कृत्वा चार्ट्पत्रे कांश्चन सूचकान् प्रदर्शयतु। सङ्घे स्थित्वा पुस्तकं सम्यक् पठित्वा आशयानुसारं कथास्तम्भस्य क्रमीकरणाय निर्दिशतु। छात्राः परस्परं मूल्यनिर्णयं कुर्वन्तु। कथास्तम्भान् क्रमीकृत्य चार्ट्पत्रे प्रदर्शयतु।

सूचकाः- सन्तुष्टः सर्पः प्रतिदिनम् एकैकं सुवर्णनाणकं पात्रे अर्पयति स्म।

कुपितः सर्पः बालं दशति सः बालः मृतश्च।

एष मम क्षेत्रपालः, क्षीरमानीय ददामि।

एकदा कृषकः पुत्रं नियुज्य देशान्तरं गतः।

अत्याग्रही बालः सर्पं हन्तुं दण्डेन अताडयत्।

एष मम क्षेत्रपालः, क्षीरमानीय ददामि।

सन्तुष्टः सर्पः प्रतिदिनम् एकैकं सुवर्णनाणकं पात्रे अर्पयति स्म।

एकदा कृषकः पुत्रं नियुज्य देशान्तरं गतः।

अत्याग्रही बालः सर्पं हन्तुं दण्डेन अताडयत्।

कुपितः सर्पः बालं दशति सः बालः मृतश्च।

**मूल्यनिर्णयसूचिकाः** - आशयावगमनम्। उचितरीत्या क्रमीकरणम्।

# अधिकविस्तरः

**कालवाचकाः लकाराः षट्**

| | | | | | |
|---|---|---|---|---|---|
| १ | लट् | - | वर्तमानकालः | - | भवति। |
| २ | लङ् | - | अनद्यतनभूतकालः | - | अभवत्। |
| ३ | लुङ् | - | भूतकालः | - | अभूत् । |
| ४ | लुट् | - | अनद्यतनभाविकालः | - | भविता । |
| ५ | लृट् | - | भविष्यत्करालः | - | भविष्यति । |
| ६ | लिट् | - | अनद्यतने परोक्षे भूते | - | बभूव । |

**प्रकारबोधकाः लकाराः चत्वारः**

१ लोट् - आज्ञा प्रार्थना निमन्त्रणादयः - भवतु ।

२ विधिलिङ् - विधिनिमन्त्रणादयः -भवेत् ।

३ आशिर्लिङ् -आशीः - भूयात् ।

४ लृङ् - हेतुहेतुमद्भावे -अभविष्यत् ।

**पञ्चतन्त्रस्य आविर्भावः**

पुरा दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरमासीत्। तत्र अमरशक्तिः नाम राजाआसीत्। तस्य दुर्मेदस्, बहुशक्तिः, उग्रशक्तिः,अनन्तशक्तिः इति चत्वारःपुत्राःआसन्। ते शास्त्रपठने विमुखाः अभवन्। अमरशक्तिः पुत्रान् शास्त्रपठनेन समर्थान् कर्तुं मन्त्रिणां निर्देशानुसारं विष्णुशर्मनामकस्य पण्डितस्य समीपम् अनयत्। बालाः शास्त्रपठने विमुखाः इति मत्वा पण्डितवरेण्यःविष्णुशर्मा लघूनां कथानां साहाय्येन शास्त्रं पाठितवान् । ताः कथाः एव पञ्चतन्त्रकथाः इति व्यवह्रियन्ते ।

**पञ्चतन्त्राणि** - मित्रलाभः,मित्रभेदः,काकोलूकीयं,लब्धप्रणाशः,अपरीक्षितकारकं च।

## प्रवृत्तिपुटम् (worksheet)

अध्यापिका कक्ष्यां प्रविश्य छात्रसंख्यानुसारं प्रवृत्तिपुटानि छात्रेभ्यः ददातु। प्रवृत्तिपुटे वर्तमानानि चित्राणि दृष्ट्वा कथायाः लेखनाय निर्दिशतु । चित्रानुसारं कथां लिखतु ।

**सूचना** - (काकः,पिपासा,जलं,घटम्,अचिन्तयत्,पाषाणखण्डानि,सन्तुष्टः)

## चतुरःकाकः

कस्मिंचित् वृक्षे एकःकाकः । सः पिपासया क्षीणितःअभवत्। जलान्वेषणार्थं सः इतस्ततःसञ्चरति स्म। अन्ते सः एकं घटम् अपश्यत्। घटे किञ्चित् जलम् अपश्यत्। पिपासाकुलः काकः जलं पातुम् असमर्थः अभवत्। सःएकम् उपायम् अचिन्तयत्।चतुरः काकः पाषाणखण्डानि स्वीकृत्य घटे न्यक्षिपत्। जलं घटस्य गलपर्यन्तम् आगच्छत् । तद्दृष्ट्वा सन्तुष्टः काकः जलं पीत्वा डयते स्म।











